कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 619 विषय धर्मशास्त्र.

नाव. कर्मविपाकसमुच्चय.

लेखक/लिपीकार चंद्रचुडभट्ट. MSS.

पृष्ठ 8 काळ शके 1739 पूर्ण/~~अपूर्ण~~

कर्मविपाक

श्रीगणेशाय नमः ॥ अथ कर्मविपाको लिख्यते ॥ नमस्कृत्य गणाधीशं पितरौ च
पितामहं ॥ क्रियते चंद्रचुडेन कर्मपाकसमुच्चयः ॥१॥ तत्र शातातपः ॥ प्रायश्चित्त वि
हीनानां महापातकिनां नृणां ॥ नरकांते भवेज्जन्म चिन्हांकित शरीरिणां ॥२॥ प्रति
जन्म भवेत्तेषां चिन्हं तत्पापसूचकं ॥ प्रायश्चित्ते कृते वापि पश्चात्तापवतां पुनः ॥३॥ महा
पातकजं चिन्हं सप्तजन्मानि जायते ॥ उपपापोद्भवं पंच त्रीणि पापसमुद्भवं ॥४॥ दुष्कर्म
जा नृणां रोगा यांति चैवं क्रमाच्छमं ॥ जपैः सुरार्चनैर्होमैर्दानैस्तेषां समो भवेत् ॥५॥ पूर्व
जन्मकृतं पापं नरस्य च परिक्षये ॥ बाधते व्याधिरूपेण तस्य कृच्छ्रादिभिः शमः ॥ दशापं
चाथ चतुर उपवेश्य द्विजान् शुभान् ॥६॥ तेषामनुज्ञया सर्वं प्रायश्चित्तमुपक्रमेत् ॥
विधाय वैष्णवं श्राद्धं संकल्प निजकाम्यया ॥ धेनुं दद्याद्द्विजातिभ्यो दक्षिणां वा स्वशक्तितः ॥७॥

अलंकृत्य यथाशक्ति वस्त्रालंकरणैर्द्विजान् ॥ ५ ॥ चरेद्रोगानुसारेण प्रायश्चित्तं यथोचितं ॥ ६ ॥ कर्मविपा
कसुधानिधौ ॥ तीव्राणां द्वादशाब्दं प्रत्येकं परिकीर्तितं ॥ मध्यमानां तदर्द्धं स्यादधमानां तदर्धकमि
ति ॥ १ ॥ याज्ञवल्क्योपि ॥ ब्रह्महा क्षयरोगी स्यात्षडब्दं व्रतमाचरेदिति ॥ प्रायश्चित्तप्रकारो ब्रह्महत्यादिप्रा
यश्चित्तवत्क्षेयः ॥ तत्र विशेषः ॥ ममामुकरोगनिदानपातकनिरासार्थं प्रायश्चित्तमुपदिशंतु भवंतः ॥ तेपि
भने कृतेन तवामुकरोगनिदानपातकनाशो भविष्यतीति वदेयुः ॥ अन्ये सर्वं प्राकृतं ॥ अथ रोगाणां निदा
नानि प्रायश्चितानि दानानि चोच्यंते ॥ अथ क्षयो ॥ तत्र याज्ञवल्क्यः ॥ ब्रह्महा क्षयरोगी स्यात्षडब्दव्र
तमाचरेत् ॥ प्रायश्चित्तार्द्धमर्हंति स्त्रियो रोगिण एव च ॥ सुवर्णकदलीदानं तस्य रोगस्य शांतये ॥ धर्म
शास्त्राण्यविज्ञाय प्रायश्चित्तं ददाति यः ॥ राजयक्ष्मा भवेत्तस्य रोगपीडातिदारुणा ॥ व्याधिप्रतिकृतिं द
द्यात्तस्य रोगस्य शांतये ॥ राजयक्ष्मा कृशातनुः शरचापासितर्जनी ॥ दधत्त्रिनेत्रा दंष्ट्रोग्रा निरुषो हंतुमु
द्यतः ॥ कृतिविधाने ॥ असाध्यव्याधिनाग्रस्तमुग्रेण प्राणहारिणा ॥ यातेरुद्रेति सूक्तेन प्रत्यहं वाग्यतः शुचिः
पूर्णमाज्याहुतीर्हुत्वा उपतिष्ठेत शंकरं ॥ हविष्येण वर्त्तेत एकांतरमतंद्रितः ॥ पूर्णमासे जयेन्मृत्युं रोगेभ्य
श्च प्रमुच्यते ॥ होमकर्मण्यशक्तानां जपस्तद्द्विगुणो भवेत् ॥ शातातपः ॥ राजहा राजयक्ष्मी स्यादोषा
तस्यापि निष्कृतिः ॥ गोभूहिरण्यमिष्टान्नं जलवस्त्रप्रदानतः ॥ अथ शूलरोगः ॥ तत्र याज्ञवल्क्यः ॥
अन्नहर्ता च शूली स्यात्तस्य निष्कृतिरुच्यते ॥ प्रायश्चित्तं च कर्तव्यं षाण्मासिकं तदर्धकं ॥ चतुर्वर्गचिंताम

गो॥ शूलेन शूलीभवति मनुष्याणां च हिंसकः॥ शूलदानं च कर्तव्यं सौवर्णादि सर्वशक्तितः॥ वृद्धशाता
तपः॥ शूद्रस्यैव तु भुक्तान्नं मत्रतस्य द्विजः स्य च॥ शूलव्याधिर्भवेन्नित्यमजीर्णेनातिपीडितः॥ अत्रे
वं निष्कृतिः कार्या उपवासत्रयं तथा॥ दद्यात् सलत्रयं रौप्यं ब्राह्मणाय च कांचनं॥ विश्वस्य विषदाता
च पृष्ठे हृत् शूली च जायते॥ एतन्निबर्हणार्थं तु प्रायश्चित्तं समादिशेत्॥ चांद्रायणं पराकं च तथा घोघं जप
एव च॥ अपामार्जनकस्यापि जपसंध्यात्रये भवेत्॥ ब्राह्मणं दानमाहुर्यदानार्थं न दत्तातिथः॥ स भवे
ज्जठरे शूली तथा ध्मानी च कर्मचित्॥ कृच्छ्रातिकृच्छ्रं चांद्रोणि स कुर्याद्रोगमुक्तये॥ गोगामी कष्टेटि
शूली स्यात् तस्य चांद्रायणं तथा॥ कृच्छ्रं चैव तिकृच्छ्रं च जपं सौरं च निर्दिशेत्॥ गावासकांचनं दद्यात् हिरण्यं
च शक्तितः तथा॥ पूर्वजन्मनि नास्ति क्यात्संध्यादि रहितो द्विजः॥ नरकांते हस्तशूली कृच्छ्रद्वादशकं दिशे
त्॥ भोजयेद्ब्राह्मणं शक्त्या जपं सौरं हिरण्यदः॥ मिथुनश्रुणात् पित्रोः कर्णशूली भवेत्तु सः॥ निष्कर्षं वं शाति
कं दद्यात् ब्राह्मणाय कुटुंबिने॥ विष्णुप्रकाशकान्मंत्रान् जपद्रोगोपशांतये॥ अपामार्जनपाठेन मंत्रि
तं च जलं पिबेत्॥ भोजनं ब्राह्मणेभ्यश्च प्रदद्याद्दक्षिणां तथा॥ नग्नां परस्त्रियं दृष्ट्वा सूर्यमस्तमयोदये॥
नेत्रशूली भवेत्सोपि नेक्षितुं क्षमते दृशा॥ वाचं मेदेहि मंत्रं वा होमं तस्यायुताष्टकं॥ वयः सुपर्णा इति च
मंत्रो दृष्ट्वा तिकामतः॥ शातातपः॥ शूलीपरोपतापेन जायते वपुषा तनुः॥ सोन्नदानं प्रकुर्वीत तथा रुद्रं
जपेद्बुधः॥ इति शूले॥ अथ ज्वरे॥ तत्र गार्ग्यः॥ यः परं क्रूरकर्माणः पापाः पिशुनचेतसः॥ भवेयुस्तेस

दाभीमज्वरवांश्छेदेनसः शांतयेयुतसंख्याकंप्रकुर्यान्नियतोजपं जातवेदसमंत्रेणब्राह्मणांभोजयेत्त
तः सहस्रकलशस्नानंशतभोजनमेवच मंगलेषुचकार्येषुसततंकोपवाञ्नरः उष्णज्वरक्षिप्रकर्मस्या
तस्यपापप्रमुक्तये सहस्रकलशस्नानं रुद्रेणेशस्यकारयेत् ब्राह्मणाभोजयेच्छतंतथाजपेद्देजातवे
दसं माहेश्वरतंत्रेपि॥ उष्णज्वरेमहेशस्यप्रकुर्याद्दभिषेचनं शातातपः देवस्वहरणाच्चैवजायतेविष
मज्वरं॥ कुंभदानंप्रकर्त्तव्यंसर्वज्वरनिवारणं॥ अथश्वासे शातातपः॥ हतघ्नोजायतेमर्त्यः कफवान्
श्वासकासवान् ॥ उष्णज्वरीचनित्यंहिपित्तरोगसमन्वितः॥ चांद्रायणत्रयंकृत्वापुंश्चाशद्विप्रभोजनं॥
अग्निंहुतास्वसस्रूकेनचरुणासर्पिषायुतं॥ अष्टाधिकंचजुहुयादुक्तरोगोपशांतये॥ पिशुनोसूरणस्या
त्तेजायतेश्वासकासवान्॥ घृततैलप्रदानव्यंसहस्रफलसंख्यया॥ घंनघजपःकार्योहोमश्चवाज्ययोर
पि॥ अथरोगे॥ शातातपः॥ आदौमार्गेनदीतीरेछायायांपुलितेजनः॥ मूत्रंपुरीषंवाल्मीकेयोमुंचति
जलेपिवा॥ सत्त्रोफव्याधिमाप्नोति एवमाहसदाशिवः॥ शोफीकृत्वात्रयंकृत्वागायत्र्या अयुतंजपं तिल
होमसहस्रंतुजपेन्नसुजयंतथा॥ इंद्रवोविश्वतस्परिजपद्दशोत्तराश्युतं आपोहिष्ठेतिहोमस्याच्चरुणा॥
सर्पिषायुतं बौधायनः॥ विघ्नकर्त्ताचभोक्तृणां शोकीभवतिमानवः॥ तस्यपापविशुध्यर्थंदुकूलंरत्नसंयुतं
ब्राह्मणायांप्रदातव्यं सर्वशोकोपशांतये॥ अथपांडुरोगे॥ शातातपः॥ देवद्विजद्रव्यहरीपांडुरोगीभवेन्न
रः॥ कृत्वातिकृच्छ्रंकुर्याच्चचांद्रायनतमंद्रितः॥ कुर्यात्कुष्मांडहोमंचस्वर्णंचेंद्रंजनासंसा॥ ब्राह्मणेभ्योय

२

धात्रा त्तिः पांडुरोगस्य शांतये॥ शौनकः॥ अंसजागमने मर्त्यः पांडुरोगी प्रजायते॥ राजतीं शक्तिं वीत
त्रंद द्योग्रो गोप्रशांतये॥ अथांडवृद्धिहरं॥ शातातपः॥ यज्ञादौ विघ्नकर्तृत्वात्कुरंडी समवेद्भुवि॥ निरस्यात्तु तुल
त्वासेवयाद्देवंमम धोक्षजं॥ अथ व्रणहरं॥ शातातपः॥ जासुत्तमस्त्रीगमेनाज्जायते मस्तकव्रणी॥ तस्मा
त्तक विशुध्यर्थं प्राजापत्यव्रतं चरेत्॥ व्याधिप्रतिकृते चान्नदानानां तस्योपशांतये॥ श्रोत्रियस्त्रीप्रसंगेन
जायते नासिकाव्रणी॥ आचरेत्स विशुध्यर्थं प्राजापत्यचतुष्टयं॥ व्याधिप्रतिकृतिं तत्र दानानां तस्योपशांत
ये॥ स्वजातिजायागमनेज्जायते हृदयव्रणी॥ तस्मात्तक विशुध्यर्थं प्राजापत्यव्रतं चरेत्॥ व्याधिप्रतिकृति
तत्रदानानां तस्योपशांतये॥ तलघुबं धन प्रीये निमितेनाम्रियेतु यः॥ स भवेद्धपुषि दुष्टं हि व्रणं तस्यापि नि
ष्कृतिः॥ सद घांद्रोगद्धयं सम्यक्कुपं चान्नद्विप्रभोजनं॥ दक्षिणान्वियथाशक्त्या मुक्तो भवति रोगतः॥ पित
ष्वसाभिगमने दक्षिणांगे व्रणी भवेत्॥ तेनापि निष्कृतिः कार्या अजादानेन यत्नतः॥ मातृष्वसाभिगम
ने वामांगे तु व्रणी भवेत्॥ तेनापि निष्कृतिः कार्या सम्यक्कुद्दासीप्रदानतः॥ फलहारी तु पुरुषः स भवेच्छ्वांगु
लिव्रणी॥ नानाफलानामयुतं सदद्याच्च द्विजन्मने॥ हीनजातिस्त्रिगमनाज्जायते चरणाव्रणी॥ तस्मा
त्क विशुध्यर्थं प्राजापत्यं समाचरेत्॥ मृते भर्तरि या नारी ब्रह्मचर्यविघातिनी॥ सा भवेद्व्रणदोषेण संभोक्तुं
क्षमते न तु॥ संभोगानंतरं तीव्रवेदना पुरुषस्य च॥ दद्यान्नीलवृषणांत्री नूसामधुसर्पिस्तिलानपि॥ अथ
भगंदरहरणं॥ शातातपः॥ सगोत्रस्त्रीप्रसंगेन जायते च भगंदरी॥ तेनापि निष्कृतिः कार्या मेषदानेन

यसौत्नतः॥ राज्ञतो वाध प्रस्त क्षसुवर्णखुरसंयुत॥ तत्र दानमंत्रः॥ देवानां येमुखं हव्या वाहनः सर्वपूजि
तः॥ तस्यत्वं वाहनं पूज्यं देवर्षी मं देहि बिभिः॥ ५॥ भगंदरः पूर्वजन्म विपाको यं तु यन्मनः॥ तत्सर्वं नाशाय क्षिप्र
सौख्यं वापि प्रवर्द्धयः॥ ॥अथ गंडमालाहरं॥ शातातपः॥ अध्यापयति यो रक्तयः शायं गुरुस्तथा॥ शिष्याग्
रुं वर्चयत्वा अधीते तस्य तस्य च॥ जायते गंडमाला स्यो रोग स्तदुपशांतये॥ अभक्ष भक्षको यो सौ गंड
माली भवेन्नरः॥ कृच्छ्रत्रयं प्रकुर्वीत चांद्रायणमथापरं॥ अष्टोत्तर सहस्रं तु जपेत्पुरुषसूक्तकं॥ सौरमंत्र
जपेत्तद्दृक्षी भ्या मितिमाजनं॥ ब्राह्मणान्भोजयेच्छक्त्या ततो रोगा त्प्रमुच्यते॥ अथ पित व्रण हरं॥ शा
तातपः॥ चांडालादि वचः श्रण्वन्यो जुं जानं स्तथैव च॥ भुक्ते स पादृल तनुः पितोद्रेकी च जायते॥ व्रणा वा
न पिजायंते तस्या पस्याय नुतये॥ कृच्छ्राति कृच्छ्रं कुर्वीत चांद्रायणमथापरं॥ यथा विभवतो हत्वा तिलान्वेद विदे
तथा॥ यमसूक्तेन विप्रेंद्र सर्पिषा मधुसूदन॥ सहस्रं जुहुयाद् न्नं मम प्रीत्यर्थमेव च॥ सुवर्णगजदानं च
व्रणरोगस्य शांतये॥ अथ स्फोटहरं॥ खरकाकादि मासानां भक्षक स्फोटवान्भवेत॥ पार्श्वयोस्तं निवृत्त्यर्थं
कृच्छ्रं चांद्रायणस्तथा॥ अतिकृच्छ्रं प्रकर्त्तव्यो सजश्रोत्तर संयुतं॥ ॥अथ स्त्री स्तन स्फोट हरं॥ यावमन्यंतु
भर्त्तारं जारमालिंग्य तेन च॥ सार्द्धं क्रीडति या नारी तमेवानुस्मरन्यपि॥ तस्य स्तु स्तनयो स्फोटा जायते जनना
तरे॥ भगे च रक्तं श्रवति तद्रोगस्य प्रशांतये॥ दद्याहाः पंचलवन हरिद्रा धान्यमेव च॥ उमामहेश्वरं चैव पूजये
श्च धने सति॥ निष्क द्वादशकं दद्याज्जपेत्तमग्निसूक्तकं॥ तथा॥ प्रसूता गोः पयपीत्वा सर्वांगे स्फोटवान्भवेत्॥

उपवासत्रयं कृत्वा भोजयेद्विंशति द्विजान्॥ अथ वातरोगहरं॥ शातातपः॥ स्वामिद्रोहाद्गतरोगी भवेत्तस्यापि निःस्कृतिः॥ कृच्छ्रातिकृच्छ्रं कुर्वीत चांद्रायणमथापरं॥ वात अवातु मंत्रं हि जपेदयुतसंख्यया॥ अग्निरस्मीत्यस्य वापि जपेच्च जुहुयादपि॥ ॥अथोन्मादवायुहरं॥ मोहयित्वा परान्वस्तु भुंक्ते वस्तु विगर्हितं॥ सोन्मादवातयुक्तः स्यात्कृच्छ्रं चांद्रायणं तथा॥ जपेत्सारस्वतं मंत्रं कुर्याद्वा ब्रह्मतर्पणं॥ ॥अथ धनुर्वातहरं॥ अतिकृच्छ्रं मधुबला उपभुक्ते परस्त्रियं॥ बलाद्वा कामतो वस्तु धनुर्वातीस्य जायते॥ तस्योपशमनार्थं तु महिषीदानमाचरेत्॥ कृच्छ्रातिकृच्छ्रं कुर्वीत चांद्रायणमथापरं॥ घघन्नघजपेच्चैव शक्त्या ब्राह्मणभोजनं॥ अयुतं त्रितया सूक्तस्य च जपेद्रोगोपशांतये॥ अथ पक्षघातहरं॥ शातातपः॥ स भार्यां पक्षघाती च जायते पक्षघातवान्॥ किंचित्तु परिमितं हेम सदया श्व द्विजा[illegible]यतः॥ श्राद्धं चैवेह वै कार्यं आत्मनो हितमिच्छता॥ सप्तधान्यानि दद्याच्च गोदानं तत्र कारयेत्॥ अथ वातरक्तहरं॥ शातातपः॥ रक्तवस्त्रप्रवालानां हारी स्याद्वातरक्तवान्॥ चांद्रायणत्रयं कुर्यात्तद्रोगस्य प्रशांतये॥ सवस्त्रां महिषीं दद्यात्सप्तरागसमन्विताम्॥ महिषीदानमंत्रः॥ कालरूपस्य रूपां तां महिषीं रक्तभूषणां॥ सालंकृतां प्रदास्यामि मम शांतिं प्रयच्छ मे॥ वातपित्तेष्ववाप्तं दद्याल्लक्ष्मीनारायणं बुधः॥ अथ रक्तपित्तहरणं॥ चैत्यद्रुमं स्वामदाद्यस्तु द्वेषाद्धर्मथान्यथा॥ प्रयोजने नरः सोयं रक्तपित्तयुतो भवेत्॥ अष्टोत्तरयुतं वह्नावग्निं दूतमिति तृचा॥ चरुं वज्जिपाभ्यां प्रजुहुयाद्रक्तपित्तापनुत्तये॥ ॥अथ श्लेष्महरं॥ पुत्रहारी चिरूषो जायते श्लेष्मलः सदा॥ चरेत्सांतपनं कृच्छ्रमिति शाता

तपोब्रवी॥ उपोष्यदिवसंसोपिदद्यात्फलशतंत्रपु॥ ॥अथवलसव्याधिहरं॥ शातातपः॥ निसानुशानर
हितोवलसीचभवेन्नरः॥ तच्छांतयेमुसमेकंयावकंभक्षयेन्नरः॥ सहस्रनामपाठश्चहोमश्चाष्टोत्तरंशतं॥
नामत्रयेनकुर्वीतचवर्जयेच्चहविर्भवेत्॥ ॥अथापस्मारहरं॥ ब्राह्मणश्चासरोधेनह्यपस्मारीभवेन्नरः
विनायकंस्वर्णमयंदद्याद्बोधायनोदितं॥ कर्मविपाकसंग्रहे॥ गुरौस्वामिनिवायस्तुप्रतिकूलसमाचरेत्
सोपस्मारीभवेत्सोपिकुर्याच्चांद्रायणंतथा॥ कयानइतिसूक्तंचजपेद्ब्राह्मणतर्पणं॥ कुर्याद्धिरण्यदानं
चशक्त्यारोगस्यशांतये॥ ॥अथशिरोरोगहरं॥ कर्मविपाकसारे॥ प्रायोपवेशाजादीनांव्रतानांत्यागका
रणं॥ शिरोरोगयुतोभ्यातन्निष्कृतिरथोच्यते॥ गोहत्यायाव्रतंकुर्यात्सिंचाशद्विप्रभोजनं॥ उद्यन्नक्तंच
जपेश्चैवहोमःकूष्मांडसंज्ञतः॥ ॥ऐकांगशिरोरोगे॥ शातातपः॥ ब्रह्मचारीयदाश्नीयभिन्नपात्रेविशेषतः॥
ऐकांशेनशिरोरोगीभवतीसाहनारदः॥ अक्षीभ्यांतइत्येतत्सूक्तमष्टोत्तरंशतं॥ जपेच्चरुघृताभ्यांचजुहु
याश्चतथैवहि॥ औषधानिप्रदद्याच्चविप्रद्वादशभोजयेत्॥ अथमुखरोगहरं॥ कर्मविपाकसंग्रहे॥ म
मेद्विदनतोन्येषांमुखरोगःप्रजायते॥ बोधायनः॥ वाग्विरोधंगुरोःकृत्वामुखरोगीभवेन्नरः॥ सौवर्णरा
जतंताम्रंपलेनार्द्धेनवापृथक्॥ गजंकृत्वाथविप्रायदद्यात्तस्योपशांतये॥ ॥अथजिव्हारोगहरं॥ शातातपः
परेषांदुःखकरणात्सर्वदानृतभाषणात्॥ जिव्हाछेत्तातथान्येषांपक्षपातश्चसंपदि॥ जिव्हारोगीभवेद
सेव्रणीचैवाभिजायते॥ पराद्धक्षितपंचैवहोमःकूष्मांडसंज्ञकः॥ कयानश्चित्रसूक्तेनजपहोमस्तथैवच॥ श्री

ध्यादीनां तथान्नं च औषधस्य संस्मृतं ॥ ॥ अथ छर्दिरोगहरं ॥ वृषदानं छर्दिरोगी गां च दद्यात् पयस्विनीं ॥
कृच्छ्रं चांद्रायणं तस्य प्रायश्चित्तं विधीयते ॥ ॥ अथ दंतपीडाहरं ॥ शातातपः ॥ आमान्नहरणे चैव दंतपी
डा प्रजायते ॥ स दद्याद् अश्विनौ हेमनिष्कद्वयविनिर्मितौ ॥ ॥ अथ श्यावदंतहरं ॥ स एव ॥ सुरायाः स्याद् दंतस्या
प्रजापत्यास्त्रिकं चरेत् ॥ शर्करायाः फलोः सप्तप्रदद्यात् पापशुद्धये ॥ जपित्वा च महारुद्रं दद्यात् शांतस्तु हुयात
तः ॥ ततोभिषेकः कर्तव्यो मंत्रैर्वरुणदैवतैः ॥ ॥ अथ दंतुरत्वहरं ॥ शूकरे निहते चैव दंतुरो जायते नरः ॥
स दद्यात् द्विशुध्यर्थं घृतकुंभं सदक्षिणं ॥ ॥ अथ मूकत्वहरं ॥ स एव ॥ मूको भ्रातृवधाच्चैव तस्येदं
निष्कृतिः स्मृता ॥ तेन कार्यं विशुध्यर्थं व्रती चांद्रायणत्रयं ॥ व्रतांते पुस्तकं देयं सुवर्णफलसंयुतं ॥ ब्राह्म
णाय च तु वेदविदे वह्निकेन संयुतं ॥ इमं मंत्रं समुच्चार्य ब्राह्मणं तं विसर्जयेत् ॥ सरस्वती जगन्माता शब्द
ब्रह्माधिदैवत ॥ दुष्कर्मकारिणं पापं रक्ष मां परमेश्वरि ॥ ॥ अथ स्खलद्वक्त्रत्वहरं ॥ शा० ॥ देवता धर्मशा
स्त्रं वा विनिंद्याद् द्विजोत्तमः ॥ अधीते तस्य नाशाय जिह्वायाः स्खलनं भवेत् ॥ अपरिस्फुटवक्ता च जिह्वायां
व्रणवानपि ॥ कल्पयेत कृच्छ्रं कुर्वीत चांद्रायणमथापरं ॥ सूक्तं तामग्निवर्णां च स्वयं जपेच्चैव वायुतत्रयं
दद्याद् हिरण्यं विप्रेभ्यो भोजनं च स्वशक्तितः ॥ ॥ अथ गद्गदस्वरहरणं ॥ शा० ॥ नास्तिको धर्मगुरोः कृत्वा भवेद् गद्ग
दवान् नरः ॥ तस्य वक्ष्ये प्रतीकारं दानेन परिभाषितं ॥ पलेन वा तदर्धेन तदर्धार्धेन वा पुनः ॥ सारस्वतीं तु प्रतिमां कु
र्याद् द्विप्राय दापयेत् ततः ॥ अथ बधिरत्वकुलहरं ॥ शाता० ॥ विद्यापुस्तकहारी च एडमूकः प्रजायते ॥ इतिहास

५

शतं दद्याद्ब्राह्मणाय सदक्षिणं ॥ इतिहासशतमाह भारतं ॥ अथ नेत्ररोगहरं ॥ कर्मविपाके ॥ कामात्परस्त्रि
यं दृष्ट्वा नेत्ररोगी भवेन्नरः ॥ चांद्रायणं पराकं च पंचाशद्द्विप्रभोजनं ॥ कुर्याद्दद्यात्सुपर्णं तौ वरुणमसर्पिषा
तथा ॥ अष्टोत्तरसहस्रं तु जुहुयाद्रोगशांतये ॥ तथा ॥ वर्चोदा असि मंत्रेण तु जपेद्दुर्जा स कांचनं ॥ दद्याद्द्वि
जाय विधिवन्नेत्ररोगप्रशाम्यते ॥ अथांधत्वहरणं ॥ मातृहा अंधः प्रजायेत तस्य दोषापनुत्तये ॥ प्राजा
पत्यं प्रकुर्वीत त्रिंशच्छास्त्रविधानतः ॥ व्रतांते दापयन्नावं सुवर्णपलसंख्यया ॥ कूपं कूर्म्यमयं कृत्वा ता
म्रपात्रे च पूजयेत् ॥ निष्कहेम्ना च कर्तव्यो देवः श्रीवत्सलांछनः ॥ नावं द्विजाय तां दद्यात्सर्वोपस्कारसंयु
तं ॥ तत्र दानमंत्रः ॥ वासुदेव जगन्नाथ सर्वभूताशयस्थित ॥ पातकार्णवमग्नं मां तारय प्रणतार्तिहन् ॥
अथ नक्तांधत्वहरणं ॥ नक्तांधं जायते तस्य यो गवान्नयनद्वये ॥ करोति शल्यप्रक्षेपं तस्य वक्ष्यामि नि
ष्कृतिं ॥ विष्णोः श्रीगोपवेशस्य दानं दद्यात्स्वशक्तितः ॥ अथ कामलाहरं ॥ वृद्धगौतमः ॥ कामली भक्त
चोरः स्यात्तस्य वक्ष्यामि निष्कृतिं ॥ सौवर्णं गरुडं कृत्वा घृतकुंभोपरि न्यसेत् ॥ सालंकृतं सवस्त्रं च ब्रा
ह्मणाय निवेदयेत् ॥ ॥ अथ कर्णरोगहरणं ॥ कर्मविपाकसंग्रहे ॥ मातापितृगुरूणां च देवब्राह्मणयोस्त
था शृणोति निंदां बुध्वा यः कर्णाभ्यां तस्य शोणितं ॥ पूयं च स्रवते तस्य शांतिकृच्छ्रचतुष्टयं ॥ हिरण्यरक्त
वस्त्राणां दानं ब्राह्मणभोजनं ॥ शांता ॥ सर्वाचारविहीनस्य प्रेतश्राद्धाशनादिना ॥ स भवेत्क्रिमिक
र्णस्तु तस्य पापस्यापनुत्तये ॥ दद्यान्नीलवृषान्नं तु यथोक्तविधिना नरः ॥ अथ कधिर्यहरणं ॥ स्वसृघा

५

तीच्चवधिरोनरकांते भवेन्नरः॥ तेनकार्यविशुध्यर्थं प्रतिचांद्रायणत्रयं॥ व्रतांते पुस्तकंदद्यात्सुवर्णपल
संयुतं॥ ब्राह्मणायप्रवतुर्वेदविदेवस्त्रेणसंयुतं॥ अथकंठरोगहरणं॥ ब्रह्मांडपुराणे॥ अभक्ष्यभक्षदो
षेणकंठरोगः प्रजायते॥ कृच्छ्रत्रयंप्रकुर्वीतदद्याद्धेनुंसदक्षिणां॥ दद्याद्देकंठरोगाणां केवलंकमूलो
द्भवं॥ दानमंत्रः॥ दुरागच्छादनलोकानां शीतवातभयापहं॥ सर्वदुखहरंयस्मादितश्शांतिप्रयच्छमे॥॥
अथपाणिरोगहरणं॥ पारावचनिर्द्धिते पीतपाणिः प्रजायते॥ पारासप्रसोवर्णंप्रदद्यान्निष्कमा
त्रकं॥ ॥अथहृत्क्रिमिहरणं॥ शातातपः॥ अभक्ष्यभक्षणाच्चैवजायते क्रिमयोहृदि॥ अथपितविशु
ध्यर्थमुपोष्यभीष्मपंचकं॥ अथक्रिमिकुक्षित्वहरणं॥ शातातपः॥ गजेननिहतेचैवक्रिमिकुक्षि
त्वजायते॥ मृतेभर्तर्यानारीनीलवस्त्रंप्रधारयेत्॥ माभृतानरकंयातिक्रिमिकुक्षिस्ततःपरं॥ नी
लवृषभान्यंचदद्याचांद्रायणव्रतं॥ ओषधंचयथाशक्त्यात्रिंशद्ब्राह्मणभोजनं॥ ॥अथवातगु
ल्महरणं॥ कर्मविपाकसंग्रहे॥ चांडालीगमनेनैवजायतेवातगुल्मवान्॥ आचरेत्तं निवृत्त्यर्थंमा
समेकंपयोव्रतं॥ मुंचामित्वेतिसूक्तेनप्रसचंचरुसर्पिषा॥ जुहयादयुतंसम्यक्कृवातआवांतुभेष
जं॥ एतसूक्तंजपेद्दद्यादन्नदानंस्वशक्तितः॥ दद्याद्विनायकंचैवसौवर्णाघिकंसंभवं॥ मंत्रेणानेनवि
धिवद्दक्षिणाभिमुखायतु॥ दानमंत्रः॥ विनायकगणेशायसर्वदेवनमस्कृतं॥ पार्वतीनंदनमनगुल्म
माशुविनाशय॥ कृतेमानेनदानेननिरोगीजायतेनरः॥ अथप्लीहोदरं॥ भ्रातकाध्यापकोयस्तुकन्या

६

दूषणतस्परः॥ प्लीहवान्संभवेद्विप्रो जपे च्छ्रीसूक्तमंत्रहि॥ अयुतंतत्त्रयसंख्याकं प्लीहोदरविमुक्तये॥ प्र
स्थंचंच भवेद्धोमं वरुणासर्पिषापृथक्॥ ॥अथजलोदरहरणं॥ पद्मपुराणे॥ जलोधराजिसुक्तस्तु भ
वेद्दुर्वगनागमे॥ पपसार्वर्तयन्मासत्रितपुंव्रतमुत्तमं॥ सहस्त्रकलशस्नानंमहादेवस्यचैवहि॥ भो
जयेच्च शतंविप्रमुच्यते किल्वीषातन॥ सौवर्णमकरंदद्याजलोदरप्रशांतये॥ अथमंदाग्निहरणं॥
शाता०॥ मंदोदराग्निर्भवतिसतिवित्ते कदन्नरः॥ प्राजापसत्रयंकृत्वाभोजयेच्चशतंद्विजान्॥ बौ
धायनः॥ अग्नेर्मांद्यंभवेतस्यप — — ग्निविनाशकः॥ वक्ष्यामितत्सीतीकारं मेषदानंविधीयते
अथजीर्णहरणं॥ शाता०॥ परान्नविघ्नकरणादजीर्णमपिजायते॥ तिलहोमंप्रकुर्वीतप्रायश्चित्तंय
थाविधिः॥ ॥अथप्रज्ञाहीनत्वहरणं॥ ब्रह्मवैवर्त्ते॥ गुरुणाह्यननुज्ञातो यो वेदाध्ययनंचरेत्॥ सज
डःप्रज्ञायाहीनः संसारेजायतेन्नरः॥ घंटादानंतुकर्त्तव्यंतस्यदोषस्यशांतये॥ ॥अथमूत्रकृच्छ्रहर
णं॥ शा०॥ गुरुजायाभिगमनान्मूत्रकृच्छ्रंप्रजायते॥ वरुणप्रतिमादानंतस्यरोगस्यशांतये॥ तिल
पात्रत्रयंचैवसद्घाद्वात्मशुद्धये॥ ॥अथबहुमूत्रहरणं॥ शा०॥ दुग्धचोरस्तुपुरुषोजायतेबहुमूत्र
वान्॥ सद्घाद्दुग्धधेनुंचब्राह्मणाययथाविधिः॥ अथप्रमेहत्वहरणं॥ शा०॥ चांडालीगमनात्सर्वप्र
मेयव्याधिमान्भवेत्॥ क्षुत्पिपासातुरश्चैवजायतेतस्यनिष्कृतिः॥ चांद्रायणत्रयंकुर्याधवमध्यंत
पापरं॥ इदमापइतिद्वाभ्यांमुदुत्तमथैकया॥ जुहुयात्सर्पिषान्वेतान्ज पेन्मंत्रान्समाहितः॥ तथा॥

६

तपस्विन्याश्च गमने प्रमेहो जायते गदः॥ मासं रुद्रजपः कार्यो दद्याच्छक्त्या च कांचनं॥ ॥अथ लिंगव्याधिहरणं॥ शा०॥ मातृगामी भवेद्यस्तु तस्य लिंगं विनश्यति॥ कुबेरप्रीतये दद्यात्कुंभमेकं सदक्षिणं॥ ॥अथ षंढत्वहरणं॥ शातातपः॥ दुष्टवादी च षंढः स्यात्स दद्याच्च द्विजन्मने॥ रोप्यं पलत्रयं दुग्धघेदृत्रयसमन्वितं॥ ॥अथ गुदरोगहरणं॥ शा०॥ सुरालयजले वापि सकृद्विष्ठां करोति यः॥ गुदरोगो भवेत्तस्य पापरूपः सुदारुणः॥ मासं सुराचनैर्वापि गोदानद्वितयेन च॥ प्राजापत्यत्रयेनचैकेन शाम्यंति गुदजा रुजः॥ अथ आर्षरोगहरणं॥ शाता०॥ दत्वाथ चेतनं यो ऽन्यत्र दाया पिच्चवेतनं॥ अध्यापयेच्च जुहुयात्जपे सोर्षयुतो भवेत्॥ तन्निवृत्त्यै प्रकुर्वीत कृच्छ्रं चैवातिकृच्छ्रकं॥ चांद्रायणं च कुर्वीत जपेत्पुरुषसुक्तकं॥ उपंत्रघृतं च विष्णुः हृदयं च जपेत्तथा॥ तामग्निवर्णामिति जपेत्सूक्तं विधानतः॥ हिरण्यं सघृतं दद्याच्छ्रोत्रियाय कुटुंबिने॥ तथा॥ आर्षवानोव धान्मत्य इति बौधायनोब्रवीत्॥ सौवर्णी सौ गां प्रकुर्वीत दद्याद्विप्राय भूषितां॥ दानमंत्रमाह॥ गोविंद गोपीजनवल्लभेश कंसासुरघ्न त्रिदशेंद्रवंद्य॥ गोदानतः पेः कुरु मे दयालो आर्षो विनाशो क्षिपितस्त्रिवर्गः॥ ॥अथातिसारहरणं॥ कर्मविपाकसंग्रहे॥ स्मार्ताग्निं श्रौतमपि यस्त्यक्तः सोतिसारयुतो भवेत्॥ त्रैमासिकव्रतं तत्र प्रायश्चित्तं समाचरेत्॥ अग्निरस्मीति च जपेत्स्वादशांशं जुहुयात्तिलान्॥ सर्पिषा च प्लुतान् दद्याद्धिरण्यं ब्राह्मणाय वै॥ शातातपः॥ स्त्रीहंता चातिसारी स्यादश्वत्थान् रोपयेद्दश॥ दद्याच्च शर्करा धेनुं भोजयेच्च शतं द्विजान्॥ अथ रक्तातिसार॥ शा०॥ षडब्दं च व्रतं कुर्याद

७

नंदद्याद्यथोदितं॥सुवर्णपत्रिकां कृत्वा सुवर्णदशकेन तु॥ दद्याद्विप्राय संपूज्य ततः पापः स्याद्वितिब्रुवन्॥ अ
थ गुल्मकुष्टकृच्छ्रकुष्टयोः हरं॥ भ्रातृजायाभिगमने गुल्मकुष्टं प्रजायते॥ स्नुषाभिगमने चैव कृच्छ्रकुष्टं प्र
जायते॥ तेन कार्यं विशुध्यर्थं प्रायश्चित्तं तु अपूपकं॥ दद्यादेकं स्वप्रतिमादानं रोगप्रतिकृतिं तथा॥ ॥अथ कुष्टि
हरं॥ शातातपः॥ पितृव्यपत्नीगमनात् कटिकुष्टि भवेन्नरः॥ निःकृतिस्तेन कर्त्तव्या कन्यादानेन यत्नतः॥
प्रायश्चित्तं प्रकर्तव्यं त्रिवार्षिकमुदाहृतं॥ ॥अथ नेत्रकुष्टहरं॥ मातुलान्या स्तृ गमनान्नेत्रकुष्टं प्रजाय
ते॥ कृष्णाजिनप्रदानेन प्रायश्चित्तं समाचरेत्॥ ॥अथ श्वेतोष्ठत्वहरं॥ तांबूलहरणाच्चैव श्वेतोष्ठः संप्र
जायते॥ दक्षिणासहितं दद्याद्वेदं दुर्यन निद्रया॥ ॥अथ वंध्यत्वहरं॥ शातातपः॥ वंध्यात्वे तु सुवर्णस्य धे
नुं दद्याद्यथाविधिः॥ वंध्यात्वं काकवंध्यात्वं कन्याप्रसव एव च॥ तथैव मृतवंध्यात्वं दानेन हरति ध्रुवं॥
अथ प्रदरहरं॥ शातातपः॥ यतिसंपर्कदोषेण जायते पापभोगिनां॥ श्रवद्रक्ता सदा योनी तु तन्निष्कृतिरिहो
च्यते॥ मासोपवासं कुर्वीत तथा मासपयोव्रतं॥ अथ स्त्रीस्तन्याद क्षीरणहरं॥ शातातपः॥ क्षीरं स्तु लूति
या नारी पूर्वजन्मनि सव्रता॥ जन्मांतरे तु तस्या वै क्षीरं न क्षरति स्तनो॥ क्षीरान्नं भोजयेद्विप्रान् साज्यं
च मधुखंडकं॥ अनुलिंपेच्च ते नेव उछिष्टान्नेन भक्षितः॥ विप्रपादोदके श्वा पिप्पलालये तु कुर्चे मंडलं॥ अ
थ मेदोवृद्धिहरं॥ दधिचोरस्तु पुरुषो मुक्ते भवति मेदसा॥ दधिधेनुः प्रदातव्या तेन विप्राय शुद्धये॥ अथ मृ
तभार्यादुःखकर्महरणं॥ शातातपः॥ जेष्ठभ्रातर्यनूढे तु यो नु जो दहति स्वयं॥ सभवेन्मृतपत्नीक उष्णज्वरस

७

मन्वितः॥प्राजापत्यत्रयंकुर्यादेकवत्रयमेववा॥तामग्निमृत्ता त्वाज्येन चरुणा होत्तरायुतं॥ जुहुयात्भोज
येद्विप्रामेवंपापात्प्रमुच्यते॥ तथा॥ मित्रभार्याभिगामीचमृतभार्यश्च जायते॥तस्यपापविशुध्यर्थंद्वि
जमेकं विवाहयेत्॥ ॥अथस्त्रीविरक्तिहरं॥ शातातपः॥ धर्मपत्नीसुव्रतायामुखेमैथुनकारणं॥पत्नीविर
क्तिर्भवतिसुवर्णकलशेनवु॥उमामहेश्वरंदेवंरुद्रैकादशानीजपेत॥स्नापयेद्रुद्रयायुक्तो द्याविंशिन्नोबुधा
रया॥त्र्यंबकेनचमंत्रेणजुहुयात्त्रुणेदपि॥ ॥अथमृतपुत्रत्वहरणं॥शातातपः॥बालघातीचपुरुषामृत
पुत्रःप्रजायते॥ब्राह्मणोद हनंचैवकर्तव्यंतेनशुध्यति॥श्रवणंहरिवंशस्यकर्तव्यंचयथाविधिः॥दावाग्नि
दायकश्चैवरक्तातिसारवान्भवेत्॥तेनोदपानंकर्तव्यंरोपणीयस्तथावटः॥ ॥अथपामा॥शातातपः॥अ
नुलपतियोन्येषांविषयान्पूर्वजन्मनि॥सोन्यजन्मनिपामावान्भवस्त्रवतिशोणितं॥संपूर्यतानिकृत्स्नार्थंउपवा
सत्रयंभवेत्॥भोजयेच्चद्विजानेमानूपंचाशसंख्यया न्वितान्॥ ॥अथलूतिहरणं॥गोत्रहालूतिकीचैवप्रा
जापत्यशतंचरेत॥व्रतांतेमेदिनीदद्यात्कुणुयाच्चैषभारत॥ ॥मूंकंडुहरं॥ शातातपः॥तैलचौर्येणभवतिनरकं
डुयनःसदा॥उपोष्यसोपिविप्रायदद्यात्तैलंघटद्वयं॥अथश्रीणंगत्वहरं॥शातातपः॥वस्त्रहारीचश्रीणंगस
प्रदद्यात्सुशोभनं॥हेमनिष्कत्रयमितंसप्रदद्याद्विजातये॥दानमंत्रः॥ पीतवस्त्रयुगंयस्माद्वासुदेवस्यवल्लभं॥
प्रदानात्तस्यमेविष्णोरतःशांतिप्रयच्छमे॥ ॥अथदद्रुहरं॥बोधायनः॥ब्राह्मणान्पीडयेद्योवैदद्रुरोगीभवेन्नरः॥
तस्योपशमनंवक्ष्येसुवर्णंनतुकारयेत्॥उमामहेश्वरंदद्यात्तस्यरोगस्यशांतये॥ ॥अथदद्रुमंडलहरं॥स्वाम्यंगनाभि
मन

प

गमनेजायतेदद्रुमंडलं॥ कृत्वाल्लोहमयीधनेपलषष्टिप्रमाणतः॥ कार्पासभारसंयुक्तांसप्तधान्यसमन्वितं॥ द
द्याद्विप्रायविदुषेपापंतेक्षयमेष्यति॥ ॥अथकुष्टरोगहरणं॥ वायपुराणे॥ कुष्टीरोगीभवेत्तत्रवृषदानंविधीयते॥
राजतंवृषभंदद्याहेमशृंगीदिभूषितं॥ अथरक्तपित्तकुष्टहरं॥ शातातपः॥ स्वसुतागमनेचैवरक्तकुष्टंप्रजाय
ते॥ भगनीवागमनेचैवपित्तकुष्टिभवेन्नरः॥ अथानपत्यत्वहरणं॥ विप्ररत्नापहारीयःसोनपत्यःप्रजायते॥
तेनकार्यंविशुध्यर्थंमहारुद्रजपादिकं॥ आदित्याब्दाद्धरिवंशश्रवणंद्विजोद्वाहनं॥ ॥अथदारिद्र्यहरं॥ वायवी
ये॥ दारिद्र्योजायतेमर्त्योदानेविघ्नंकरोतियः॥ ऐश्वर्यंजायतेयेनकर्मणातच्छृणुष्वमे॥ पलेनवापलार्द्धेनचतु
र्थांशेनवापुनः॥ वदनस्पप्रतिकृतिंदद्याद्दारिद्र्यशांतये॥ ॥इसलमतिविस्तरेण॥ धर्मेश्वरात्मजश्रीमद्रुमाशं
करसूनुना॥ कृतोयंचंद्रचुडेनकर्मविपाकमुच्चयः॥ ॥इतिश्रीधर्माभट्टपौराणिकश्रीमद्विद्वन्मुकुटमाणि
क्यउमाशंकरभट्टसुतचंद्रचूडभट्टविरचितःकर्मविपाकसमुच्चयःसमाप्तिः॥ मगमस्तु॥ ॥सके१७३६भा
वानामसंवत्सरेउत्तरायणेशशिरऋतौमासोत्तमेमासेपौषमासेशुक्लपक्षसप्तम्यांचंद्रदिने इदंपुस्तकंसमाप्तं॥